तस् (३.४.७८/२१५४)–पचतः। [1]थस्–पचथः। मकारः–अपचताम्, अपचतम्। (३.४.१०१/२१९९) विभक्तौ इति किम्? 'अचो यत्' (३.१.९७/२८४२),[2] 'ऊर्णाया युस्' (५.२.१२३/१९२९),[3] 'रुधादिभ्यः श्नम्' (३.१.७८/२५४३)[4]। 'किमोऽत्' (५.३.१२/१९५९), [5]'इटोऽत्' (३.४.१०६/२२५७) [6]इत्यत्र प्रतिषेधो न भवति,[7] अनित्यत्वादस्य [8]प्रतिषेधस्य। 'इदमस्थमुः' (५.३.२४/१९७२) इत्युकारानुबन्धनिर्देशादनित्यत्वमुपलक्ष्यते ॥

## आदिर्ञिटुडवः। (५/२२८९)

इत् इति वर्तते। आदिशब्दः प्रत्येकमभिसम्बध्यते। [9]ञिटुडु इत्येतेषां समुदायानामादितो वर्तमानानाम् इत्सञ्ज्ञा भवति। ञि, 'ञिमिदा' (धा.पा. ७४३)–मिन्नः (३.२.१८७/३०८८)। 'ञिधृषा' (धा.पा. १२७०) –धृष्टः[10]। 'ञिक्ष्विदा' (धा.पा. ७४०)–क्ष्विण्णः[11]। '[12]ञिइन्धी (धा.पा. १४४९)–इद्धः। टु, 'टुवेपृ'[13] (धा.पा. ३६७)–[14]वेपथुः (३.३.८९/३२६७)। [15]'टुओश्वि' (धा.पा. १०१०) –श्वयथुः[16]। डु, 'डुपचष्' (धा.पा. ९९६)–पक्त्रिमम् (३.३.८८/३२६६)। [17]'डुवप्' (धा.पा. १००३)–उप्त्रिमम्। 'डुकृञ्'(धा.पा. १४७३) कृत्रिमम्। आदिः इति किम्? पटूयति (५.१.१२२/१७८४)। कण्डूयति (३.१.२७/२६७८)। उपदेशे इत्येव–ञिकारीयति ॥

## षः प्रत्ययस्य। (६/४७४)

[18]षकारः प्रत्ययस्यादिः इत्सञ्ज्ञः भवति। 'शिल्पिनि ष्वुन्' (३.१.१४५/२९०७)–नर्तकी, [19]रजकी। प्रत्ययस्य इति किम्? षोडः, षण्डः, षडिकः। आदिः इत्येव–'अविमह्यो[20]ष्टिषच्' (उणादि १.४५)–[21]अविषः, महिषः ॥

## चुटू। (७/१८९)

चवर्गटवर्गौ [22]प्रत्ययस्यादी इत्सञ्ज्ञौ भवतः। 'गोत्रे कुञ्जादिभ्यश्च्फञ्' (४.१.९८/१०९९)–कौञ्जायनः। [23]छस्य ईयादेशं वक्ष्यति (७.१.२/४७५)। [24]जस्–ब्राह्मणाः (४.१.२/१८३)। झस्यान्तादेशं वक्ष्यति[25] (७.१.३/२१६९)। [26]'शण्डिकादिभ्यो ञ्यः' (४.३.९२/१४७२)–शाण्डिक्यः। [27]टवर्गः, 'चरेष्टः' (३.२.१६/२९३०)–कुरुचरी, मद्रचरी। ठस्य इकादेशं वक्ष्यति[28] (७.३.५०/११७०)। [29]'सप्तम्यां जनेर्डः' (३.२.९७/३००७)–उपसरजः, मन्दुरजः। ढस्य एयादेशं वक्ष्यति (७.१.२/४७५)। [30]'अन्नाण्णः' (४.४.८५/१६३७)–आन्नः।

---

1. धस् ग. 2. चेयम् इत्यधिकम् ड. 3. ऊर्णायुः इत्यधिकम् ड. 4. रुणद्धि इत्यधिकम् ड. 5. इटोऽत् नास्ति ब. 6. इति वा ड, इति चात्र ब. 7. इति इत्यधिकम् ग. 8. प्रतिषेधस्य नास्ति फ. 9. ञिटुडु इत्येते समुदाया आदितो वर्तमानाः इत्संज्ञा भवन्ति क.ह. 10. सृष्टः ग. 11. ञिष्विदा स्नेहने (धा. पा. ९७८) स्विन्नः इत्यधिकम् अ. क. ह. 12. ञिइन्धी नास्ति क. ड. 13. विचलने इत्यधिकम् ड. 14. प्रवेपथुः ग. 15. उदाहरणमिदं नास्ति फ, विश्वयथुः ग. 16. टुक्षु क्षयथुः इत्यधिकम् ग. 17. उदाहरणमिदं नास्ति क. 18. आदिरिति वर्तते इत्यधिकम् अ.क.फ. 19. खनकी अ.क.ड.फ.ह. 20. °टिषन् ड. 21. अविषम् ग. 22. प्रत्ययस्य आदितो वर्तमानौ अ.क.ड.फ.ग.ह. 23. छकारस्य ग. 24. जकारः ग. 25. झोऽन्तः इति इत्यधिकम् क. फ. 26. ञकारस्य इत्यधिकम् फ. 27. टवर्गस्य फ. 28. 'ठस्येकः' इतिं इत्यधिकम् क. 29. डकारस्य इत्यधिकम् ग. 30. णकारस्य इत्यधिकम् ग.